শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীরামকৃষ্ণ ঐয্য্ঙ্গার্ ৱিরচিতম্

# ॥ শ্রীমদ্ৱেদান্তাচার্য পঞ্চকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমদ্ৱেদান্তাচার্য পঞ্চকম্ ॥

জযতান্নিগমান্তার্যো দযমানো গুরুশ্চিরাৎ।
ৱিযন্মণিরিৱাশ্রিত্যো দযমানো ৱিযৎপদম্ ॥ **1** ॥

ৱিদ্যোদন্ৱান্ ৱেঙ্কটেশঃ কৱীন্দ্রো
বুদ্ধ্যোৎপন্নাঃ কল্পনোর্মীর্দধানঃ।
সঙ্খ্যাতীতৈর্ভাৱরত্নৈশ্চ পূর্ণো
জীযাল্লোকেঽসীমভূমাতিরেকঃ ॥ **2** ॥

ৱেদান্তকান্তারৱিচারতশ্চ
প্রতীপৱাদীভৱিভেদনাচ্চ।
অন্ৱর্থনামানমপাস্তমানং
নমাম্যহং তার্কিককেসরীন্দ্রম্ ॥ **3** ॥

ৱেদান্তানাং সুভাগ্যাদুত সুরফণিতেঃ সাহিতীভাগধেযাৎ
আহোস্বিচ্ছ্রীশঠারের্মধুমধুরগিরাং পুণ্যরাশের্ৱিপাকাৎ।
যদ্ৱা ৱিদ্ৱদ্ৱরাণাং সুকৃতফলৱশাৎ ৱৈষ্ণৱানাঞ্চ দিষ্টেঃ
ৱেদান্তাচার্যনাম্নাকৃত জনিমৱনৌ ৱেঙ্কটাধীশ ঘণ্টা ॥ **4** ॥

পারাশর্যৱচস্সুধাং সুমনসো ভৌমান্ দিনং পাযযন্
ভিন্নান্ ৱাদরণাঙ্গণে চ কলযন্ শাস্ত্রৈঃ শিতৈঃ পত্রিভিঃ।
দুর্মানাৎ ৱিগতাং শ্রিযং প্রকটযন্ শ্রীৱৈষ্ণৱানাং পুনঃ
রারাজীদ্ৱজিতক্রিযামনুসরন্ ত্রৈয্যন্তসূরির্গুরুঃ ॥ **5** ॥

ব্যরীরচদিদং ভক্ত্যা ৱেদান্তাচার্যপঞ্চকম্।
কুরুকাপুরৱাস্তৱ্যো রামকৃষ্ণঃ শিরোমণিঃ॥ **6**॥

॥ ইতি শ্রীমদ্বেদান্তাচার্য পঞ্চকম্ সমাপ্তম্॥